শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৯১

*ভক্তিস্বরূপৱর্ণনম্*

শ্ৰীকৃষ্ণ ত্বতপদোপাসনমভযতমং বদ্ধমিথ্যার্থদৃষ্টে-
মৰ্ত্যস্যাৰ্তস্য মন্যে ৱ্যপসরতি ভযং যেন সৰ্ৱাত্মনৈৱ।
যত্তাৱত্ ত্বতপ্ৰণীতানিহ ভজনৱিধীনাস্থিতো মোহমাৰ্গে
ধাৱন্নপ্যাৱৃতাক্ষঃ স্খলতি ন কুহচিদ্দেৱদেৱাখিলাত্মন্॥ ১ ॥

ভূমন্ কাযেন ৱাচা মুহুরপি মনসা ত্বদ্বলপ্ৰেরিতাত্মা
যদ্যত্ কুৰ্ৱে সমস্তং তদিহ পরতরে ত্বয্যসাৱৰ্পযামি।
জাত্যাপীহ শ্বপাকস্ত্বযি নিহিতমনঃ কৰ্মৱাগিন্দ্ৰিযাৰ্থ-
প্ৰাণো ৱিশ্বং পুনীতে ন তু ৱিমুখমনাস্ত্বতপদাদ্বিপ্ৰৱৰ্যঃ॥ ২ ॥

ভীতিৰ্নাম দ্বিতীযাদ্ভৱতি ননু মনঃ কল্পিতং চ দ্বিতীযং
তেনৈক্যাভ্যাসশীলো হৃদযমিহ যথাশক্তি বুদধ্যা নিরুন্ধ্যাম্।
মাযাৱিদ্ধে তু তস্মিন্ পুনরপি ন তথা ভাতি মাযাধিনাথং
তং ত্বাং ভক্ত্যা মহত্যা সততমনুভজন্নীশ ভীতিং ৱিজহ্যাম্॥ ৩ ॥

ভক্তেরুতপত্তিৱৃদ্ধী তৱ চরণজুষাং সঙ্গমেনৈৱ পুংসা-
মাসাদ্যে পুণ্যভাজাং শ্ৰিয ইৱ জগতি শ্ৰীমতাং সঙ্গমেন।
ততসঙ্গো দেৱ ভূযান্মম খলু সততং তন্মুখাদুন্মিষদ্ভি-
স্ত্বন্মাহাত্ম্যপ্ৰকারৈৰ্ভৱতি চ সুদৃঢা ভক্তিরুদধূতপাপা॥ ৪ ॥

শ্ৰেযোমাৰ্গেষু ভক্তাৱধিকবহুমতিৰ্জন্মকৰ্মাণি ভূযো
গাযন্ ক্ষেমাণি নামান্যপি তদুভযতঃ প্ৰদ্ৰুতং প্ৰদ্ৰুতাত্মা।
উদ্যদ্ধাসঃ কদাচিত্ কুহচিদপি রুদন্ ক্বাপি গৰ্জন্ প্ৰগায-
ন্নুন্মাদীৱ প্ৰনৃত্যন্নযি কুরু করুণাং লোকবাহ্যশ্চরেযম্॥ ৫ ॥

www.prapatti.com

ভূতান্যেতানি ভূতাত্মকমপি সকলং পক্ষিমতস্যান্ মৃগাদীন
মৰ্ত্যান্ মিত্ৰাণি শত্ৰূনপি যমিতমতিস্তৱন্ময়ান্যানমানি।
ত্বতসেৱায়াং হি সিধ্যেন্মম তৱ কৃপয়া ভক্তিদাৰ্ঢ্যং ৱিৰাগ-
স্তৱত্তত্ত্বস্যাৱবোধোপি চ ভুৱনপতে যত্নভেদং ৱিনৈৱ॥ ৬ ॥

নো মুহ্যন্ ক্ষুত্তৃডাদ্যৈৰ্ভৱসৰণিভৱৈস্তৱন্নিলীনাশয়ত্বা-
চ্চিন্তাসাতত্যশালী নিমিষলৱমপি ত্বতপদাদপ্ৰকম্পঃ।
ইষ্টানিষ্টেষু তুষ্টিৱ্যসনৱিৰহিতো মায়িকত্বাৱবোধা-
জ্জ্যোতস্নাভিস্তৱন্নখেন্দোৰধিকশিশিৰিতেনাত্মনা সঞ্চৰেয়ম্॥ ৭ ॥

ভূতেষৱেষু ত্বদৈক্যস্মৃতিসমধিগতৌ নাধিকাৰোধুনা চে-
ত্ত্বতপ্ৰেম ত্বতকমৈত্ৰী জডমতিষু কৃপা দ্বিটসু ভূয়াদুপেক্ষা।
অৰ্চায়াং ৱা সমৰ্চাকুতুকমুৰুতৰশ্ৰদ্ধয়া ৱৰ্ধতাং মে
ত্বতসংসেৱী তথাপি দ্ৰুতমুপলভতে ভক্তলোকোত্তমত্বম্॥ ৮ ॥

আৱৃত্য ত্বতস্বৰূপং ক্ষিতিজলমৰুদাদ্যাত্মনা ৱিক্ষিপন্তী
জীৱান্ ভূয়িষ্ঠকৰ্মাৱলিৱিৱশগতীন্ দুঃখজালে ক্ষিপন্তী।
ত্বন্মায়া মাভিভূন্মামযি ভুৱনপতে কল্পতে ততপ্ৰশান্ত্যৈ
ত্বতপাদে ভক্তিৰেৱেত্যৱদদযি ৱিভো সিদ্ধযোগী প্ৰবুদ্ধঃ॥ ৯ ॥

দুঃখান্যালোক্য জন্তুষৱলমুদিতৱিৱেকোহমাচাৰ্যৱৰ্যা-
ল্লব্ধৱা ত্বদ্ৰূপতত্ত্বং গুণচৰিতকথাদ্যুদ্ভৱদ্ভক্তিভূমা।
মায়ামেনাং তৰিত্বা পৰমসুখময়ে ত্বতপদে মোদিতাহে
তস্যায়ং পূৰ্ৱৰঙ্গঃ পৱনপুৰপতে নাশয়াশেষৰোগান্॥ ১০ ॥

**********



www.prapatti.com